अक्षसंख्या (योजनसंख्या) भवतीति । निरक्षदेशात् क्षितिचतुर्थांशे किल मेरुस्तत्र नवतिः पलांशाः (अक्षांशाः) इति च तत्रैवोक्तम् । पाशके कर्षपरिमाणे च न० विभीतकवृक्षे (वयडा) तुषे, आत्मनि रुद्राक्षे सर्पे जातान्धे गरुडे च पु० । तत्र रुद्राक्षे अक्षमाला । कर्षे अनुभवति धाराभिरक्षमात्राभिरिति, विभीतके "यथा वै द्वे आमलके, द्वे वा कोले द्वौ वाक्षौ इति" श्रुतिः । व्यवहारे अक्षदर्शकः । रावणसुतभेदे पु० । तत्कथा रामा० सु० ४२ अ० ।

**अक्षक** पु० अक्ष इव कायति कै-क । तिनिशवृक्षे । स्वार्थे-कन् । अक्षशब्दार्थे प्रकृतिलिङ्गम् । [कन् । तत्रैव ।

**अक्षकूट** पु० अक्षस्य चक्षुषः कूटइव । नेत्रतारायां, स्वार्थे

**अक्षक्षेत्र** न० अक्षनिमित्तं क्षेत्रम् शा०त० । ज्योतिषोक्तेषु अक्षसाधनार्थं क्षेत्रतया कल्पितेषु अक्षभवेषु अष्टसु क्षेत्रेषु । तानि च सिद्धान्तशिरोमणौ गणिताध्याये दर्शितानि यथा । । "भुजोऽक्षभा कोटिरिनाङ्गुलो ना कर्णोऽक्षकर्णः १ खलु मूलमेतत् क्षेत्राणि यान्यक्षभवानि तेषां विद्येव मानार्थयशःसुखानाम् ॥ लम्बज्यका कोटिरथाक्षजीवा भुजोऽत्र कर्णस्त्रिभुजे २ त्रिभज्या । कुज्या भुजः कोटिरपक्रमज्या कर्णोऽग्रका च त्रिभुजं तथेदम् ३ ॥ तथैव कोटिः समवृत्तशङ्कुरग्रा भुजस्तद्धृतिरत्र कर्णः ४ । भुजोऽपमज्या समना च कर्णः कुज्योनिता तद्धृतिरत्र कोटिः ५ ॥ अग्रादिखण्डं कथिता च कोटिरुद्वृत्तना दोः श्रवणोऽपमज्या ६ । उद्वृत्तना कोटिरथाग्रकाग्रखण्डं भुजस्तच्छ्रवणः क्षितिज्या ७ ॥ खण्डं यदूर्द्ध्वं समवृत्तशङ्कोर्यत्तद्धृतेस्तावथ कोटिकर्णौ । अग्रादिखण्डं भुज ८ एवमष्टौ क्षेत्राण्यमून्यक्षभवानि तावत् ॥" क्षेत्राणि दर्शयेत्, "तत्र दक्षिणोत्तरमण्डले विषुवद्वृत्तसम्पातादधो यावाँल्लम्बः क्षितिजसमसूत्रपर्य्यन्तः सा तत्र कोटिः, लम्बनिपातकुमध्ययोरन्तरं साऽक्षज्या तत्र भुजः, भूमध्याल्लम्बाग्रगामिसूत्रं त्रिज्या सा तत्र कर्णः, इदमप्यक्षक्षेत्रम्, इष्टाहोरात्रवृत्तं यत्र क्षितिजे लग्नं तस्य प्राक्स्वस्तिकस्य चान्तरमग्रा (चापांशाः) तेषां ज्याऽग्रा तावती च प्रत्यक्क्षितिजे अग्राग्रयोर्निबद्धं सूत्रमुदयास्तसूत्रम् अहोरात्रवृत्तोन्मण्डलसम्पातस्य प्राच्यपरसूत्रस्य च यदन्तरं सा क्रान्तिज्या, सा तत्र कोटिः, अग्रा कर्णः, तदग्रयोरन्तरं सा कुज्या स भुजः इदमक्षक्षेत्रं, तथाहोरात्रवृत्तसममण्डलसम्पातादधोवलम्बः, समवृत्तशङ्कुः सा कोटिः, अग्रा भुजः, अहोरात्रवृत्ते ज्याखण्डकं तद्धृतिः कर्णः, इदमक्षक्षेत्रं, तथा कुज्योनिता तद्धृतिरहोरात्रवृत्ते ज्यार्द्धं सा कोटिः, उन्मण्डले क्रान्तिज्या स भुजः, समवृत्तशङ्कुः कर्णः, इदमक्षक्षेत्रम्, तथाहोरात्रोन्मण्डलयोः सम्पातादवलम्ब उन्मण्डलशङ्कुः स भुजः, उन्मण्डलवृत्ते क्रान्तिज्या कर्णः, उन्मण्डलशङ्कुमूलस्य प्राच्यपरसूत्रस्य च यदन्तरं तदग्रादिखण्डं सा तत्र कोटिः, इदमक्षक्षेत्रं, तथोन्मण्डलशङ्कुः कोटिः, शङ्कुमूलोदयास्तसूत्रयोरन्तरमग्राग्रखण्डं स भुजः, कोटिभुजाग्रयोरन्तरसूत्रं सा कुज्या स तत्र कर्णः, इदमक्षक्षेत्रं, तथोन्मण्डलशङ्कुना हीनः समशङ्कुस्तत्समशङ्कोरूर्द्ध्वं खण्डं सा कोटिः, कुज्योना तद्धृतिस्तद्धृतेरूर्द्ध्वखण्डं स कर्णः, अग्रादिखण्डं स भुजः, इदमक्षक्षेत्रम् एतान्यष्टौ तावत्कथितानि एवमन्यान्यपि भवन्ति ।

**अक्षज** न० अक्षात् इन्द्रियसन्निकर्षात् जायते जन-ड । इन्द्रियविषयसन्निकर्षोत्पन्ने प्रत्यक्षज्ञाने वज्रे अस्थिरूपावयवजातत्वात्तस्य तन्नामत्वम् । प्रागुक्ताक्षार्थजाते त्रि० । ज्योतिषोक्ते अक्षभवे क्षेत्रादौ च ।

**अक्षणिक** त्रि० न क्षणिकं न० । स्थिरे निश्चले च । "हरिवीक्षणाक्षणिकचक्षुषेति" माघः । अक्षणिकचक्षुषा स्थिरदृष्ट्या स्तिमितनेत्रयेत्यर्थः इति मल्लिनाथः ।

**अक्षण्वत्** त्रि० अक्ष अस्यास्ति मतुप् मस्य वः । नेत्रयुक्ते "पश्यदक्षण्वान्न विवेद" इति "अक्षण्वन्तःकर्म्मवन्तः समर्था" इति च वेदः ।

**अक्षत** पु०ब० न क्षताः । "अक्षताश्च यवाः प्रोक्ता इति का० स्मृत्युक्ते यवे । नपुंसकमिति केचित् "दूर्वाक्षतानि" चेति पुराणम् । तण्डुले, "अक्षतैर्नार्च्चयेद्विष्णुं न तुलस्या विनायकमिति" तन्त्रम् । शस्यमात्रे न० । क्षययुक्तभिन्ने उत्कर्षान्विते अविदारिते च त्रि० । "अक्षता वा क्षता वा पीति" मनुः । क्षण-भावे क्त न०त० । क्षयाभावे न० । "अक्षतञ्चारिष्टं चा स्तु" इति श्राद्धविप्रसमीपे कृतकर्म्मणोऽक्षयप्रार्थना ।

**अक्षदर्शक** पु० अक्षाणामृणादानादिव्यवहाराणां दर्शकः दृश-ण्वुल् ६त० । विवादनिर्णेतरि धर्म्माधिकरणाध्यक्षे । द्यूतदर्शके त्रि० ।

**अक्षदृश्** पु० अक्षान् व्यवहारान् पश्यति दृश-क्विन् कुत्वम् । अक्षदर्शकशब्दार्थे । अक्षार्थद्रष्टरि त्रि० ।

**अक्षदेविन्** त्रि० अक्षैर्दीव्यति दिव-णिनि ३त० । पाशकादिद्यूतक्रीड़ाकारके । [कारके ।

**अक्षद्यु** त्रि० अक्षैर्दीव्यति दिव-क्विप् ऊठ् । पाशकादिद्यूत-